## गर्गादिभ्यो यञ् । (१०५/११०७)

गोत्रे इत्येव । गर्गादिभ्यो [1]गोत्रापत्ये यञ् प्रत्ययो भवति । गार्ग्यः । वात्स्यः । मनुशब्दोऽत्र पठ्यते । तत्र कथं मानवी प्रजा ? गोत्रे इत्युच्यते । अपत्यसामान्ये भविष्यति । कथमनन्तरो रामो जामदग्न्यः, व्यासः पाराशर्यः इति ? गोत्ररूपाध्यारोपेण भविष्यति । अनन्तरापत्यविवक्षायां तु ऋष्यणैव भवितव्यं जामदग्नः, पाराशरः इति ।

गर्ग । वत्स । 'वाजाऽसे' (ग. सू. ७२)[2] । संकृति । अज । व्याघ्रपात् । विदभृत् । प्राचीनयोग । [3]अगस्ति । [4]पुलस्ति । रेभ । अग्निवेश । शङ्ख । शठ । [5]धूम । अवट । [6]चमस । धनञ्जय । [7]मनस । वृक्ष । विश्वावसु । जनमान । लोहित । शंसित । बभ्रु । मण्डु । मक्षु । अलिगु । शङ्कु । लिगु । गुलु । मन्तु । जिगीषु । मनु । तन्तु । मनायी । [8]भूत । [9]कथक । कष । तण्ड । [10]वतण्ड । कपि । कत । कुरुकत । अनडुह् । कण्व । शकल । गोकक्ष । अगस्त्य । [11]कुण्डिन । यज्ञवल्क । उभय । जात । विरोहित । वृषगण । रहूगण । [12]शण्डिल । वण । कचुलुक । मुद्गल । [13]मुसल । पराशर । जतूकर्ण । [14]मन्त्रित । संहित । अश्मरथ । शर्कराक्ष । पूतिमाष । स्थूण । अररक । पिङ्गल । कृष्ण । [15]गोलुन्द । उलूक । [16]तितिक्ष । भिषज् । भडित । भण्डित । [17]दल्भ । चिकित । देवहू । इन्द्रहू । एकलू । पिप्पलू । [18]बृदग्नि । जमदग्नि । सुलोभिन् । [19]उकत्थ । कुटीगु[20] ॥

## मधुबभ्र्वोर्ब्राह्मणकौशिकयोः । (१०६/११०८)

मधुशब्दाद् बभ्रुशब्दाच्च गोत्रापत्ये यञ् प्रत्ययो भवति [21]यथासङ्ख्यम् ब्राह्मणे कौशिके वाच्ये । माधव्यो भवति ब्राह्मणः चेत् । माधव एवान्यः । बाभ्रव्यो भवति कौशिकश्चेत् । बाभ्रव एवान्यः । बभ्रुशब्दो गर्गादिषु पठ्यते, ततः सिद्धे यञि कौशिके नियमार्थं वचनम् । गर्गादिषु पाठोऽप्यन्तर्गणकार्यार्थः, 'सर्वत्र लोहितादिकतन्तेभ्यः' (४.१.१८/४७६) इति । बाभ्रव्यायणी ॥

## कपिबोधादाङ्गिरसे । (१०७/१११०)

कपिबोधशब्दाभ्यामाङ्गिरसेऽपत्यविशेषे गोत्रे यञ् प्रत्ययो भवति । काप्यः । बौध्यः । आङ्गिरसे इति किम् ? कापेयः । बौधिः । कपिशब्दो गर्गादिषु पठ्यते । तस्य नियमार्थं वचनम्, आङ्गिरसे यथा स्यात् । लोहितादिकार्यार्थं गणे पाठः । काप्यायनी[22] ॥

## वतण्डाच्च । (१०८/११११)

आङ्गिरसे इत्येव । वतण्डशब्दाद् आङ्गिरसेऽपत्यविशेषे गोत्रे यञ् प्रत्ययो भवति । वातण्ड्यः । [23]आङ्गिरसे इति किम् ? वातण्डः । किमर्थमिदं [24]यावता गर्गादिष्वयं पठ्यते ? शिवादिषु अपि अयं पठ्यते । तत्र आङ्गिरसे शिवाद्यणोऽपवादार्थं पुनर्वचनम् । अनाङ्गिरसे[25] तु उभयत्र पाठसामर्थ्यात् प्रत्ययद्वयमपि भवति । वातण्ड्यः, वातण्डः ॥

---

1. गोत्रे फ. 2. वाजः वाज्यः इत्यधिकम् ड. 3. नास्ति फ. 4. बलस्ति फ. 5. ध्वन मधू फ. 6. मवसे फ, अनस ब. 7. नास्ति ब. 8. सूनु ग, मंठ ब. 9. मंठकथक फ, कच्छप रूक्ष तरुक्ष तलुक्ष तण्डाव इत्यधिकम् ब. 10. तलुक्षदण्ड फ. 11. कण्डिनी फ. 12. माकिल फ, प्रचुलमुद्गल ब. 13. मुल्ल फ. 14. मन्त्रिक फ. 15. गोलंगाह ब. 16. तिलंब विषज विष्णुज ब. 17. दल ब. 18. बृहदग्नि ब. फ. 19. उक्थ ब. फ. 20. सुलोहित इत्यधिकम् फ. 21. यथाक्रमं ड. 22. इति इत्यधिकम् फ. ह्. 23. वाक्यमिदं नास्ति फ. 24. यावता नास्ति फ. 25. सूत्रे इत्यधिकम् ड.